2026

संस्कृतव्याकरणम्

UGVYDE 202

लघुसिद्धान्तकौमुदी - 2

पूर्णाङ्काः – 60

समयः – सार्धहोराद्वयम्

अधस्तनानां प्रश्नानां संक्षिप्तमुत्तरं प्रदेयम्। 1×10=10

1. लघुसिद्धान्तकौमुदी इति ग्रन्थं कः रचितवान्?
2. प्रातिपदिकसंज्ञा-विधायकं सूत्रं किम्?
3. सर्वादीनि सर्वनामानि इत्यत्र सर्वादीनि इति पदे कः समासः?
4. रमा शब्दस्य तृतीयायाः बहुवचनस्य रूपं किम्?
5. सर्वनामस्थान-संज्ञाविधायकं सूत्रं किम्?
6. वारि शब्दः कस्मिन् लिङ्गे प्रयुक्तो भवति?
7. मधु शब्दस्य द्वितीयायाः एकवचनस्य रूपं किम्?
8. लिह् शब्दस्य प्रथमायाः एकवचनस्य रूपं किम्?
9. अमू इत्यत्र मूलं प्रातिपदिकं किम्?
10. अव्ययसंज्ञाविधायकमेकं सूत्रं लिखतु।

अधस्तनेषु पञ्चप्रश्नाः समाधेयाः। 6×5 =30

11. कृत्तद्धितसमासाश्च इति सूत्रस्य पदं विभज्य अर्थं लिखत।
12. सर्वादिगणे कति शब्दाः सन्ति? तेषां नामानि लिखत।
13. मति शब्दस्य रूपाणि लिखत।
14. अतोऽम् इति सूत्रस्य वृत्तिं विलिख्य अर्थं लिखत।
15. ज्ञान इति शब्दस्य रूपाणि लिखत।
16. दादेर्धातोर्घः इति सूत्रस्य पदं विभज्य अर्थं लिखत।
17. दण्डिन् इति शब्दस्य रूपाणि लिखत।

अधस्तनेषु प्रश्नेषु द्वौ समाधेयौ। 10×2=20

18. स्वौजस्... इति सूत्रं सम्पूर्णं विलिख्य व्याकुर्वन्तु।
19. जश्शसोः शिः इति सूत्रं व्याख्यायताम्।
20. इदम् इति शब्दस्य त्रिषु लिङ्गेषु रूपाणि लिखत।
21. सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
    वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥ इति कारिकायाः व्याख्यानं कुर्वन्तु।

****